# Rudrahridaya Upanishad

# રુદ્રહૃદયોપનિષત્

## Document Information

Text title : Rudrahridaya Upanishad

File name : rudrahridaya.itx

Category : hRidaya, upanishhat, shiva

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 85 / 108; Krishna Yajurveda - Shaiva upanishad

Latest update : Mar. 29, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# રુદ્રહૃદયોપનિષત્

યદ્બ્રહ્મ રુદ્રહૃદયમહાવિદ્યાપ્રકાશિતમ્ ।
તદ્બ્રહ્મમાત્રાવસ્થાનપદવીમધુના ભજે ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥

હૃદયં કુણ્ડલી ભસ્મરુદ્રાક્ષગણદર્શનમ્ ।
તારસારં મહાવાક્યં પઞ્ચબ્રહ્માગ્નિહોત્રકમ્ ॥ ૧॥

પ્રણમ્ય શિરસા પાદૌ શુકો વ્યાસમુવાચ હ ।
કો દેવઃ સર્વદેવેષુ કસ્મિન્દેવાશ્ચ સર્વશઃ ॥ ૨॥

કસ્ય શુશ્રૂષણાન્નિત્યં પ્રીતા દેવા ભવન્તિ મે ।
તસ્ય તદ્વચનં શ્રુત્વા પ્રત્યુવાચ પિતા શુકમ્ ॥ ૩॥

સર્વદેવાત્મકો રુદ્રઃ સર્વે દેવાઃ શિવાત્મકાઃ ।
રુદ્રસ્ય દક્ષિણે પાર્શ્વે રવિર્બ્રહ્મા ત્રયોઽગ્નયઃ ॥ ૪॥

વામપાર્શ્વે ઉમા દેવી વિષ્ણુઃ સોમોઽપિ તે ત્રયઃ ।
યા ઉમા સા સ્વયં વિષ્ણુર્યો વિષ્ણુઃ સ હિ ચન્દ્રમાઃ ॥ ૫॥

યે નમસ્યન્તિ ગોવિન્દં તે નમસ્યન્તિ શઙ્કરમ્ ।
યેઽર્ચયન્તિ હરિં ભક્ત્યા તેઽર્ચયન્તિ વૃષધ્વજમ્ ॥ ૬॥

યે દ્વિષન્તિ વિરૂપાક્ષં તે દ્વિષન્તિ જનાર્દનમ્ ।
યે રુદ્રં નાભિજાનન્તિ તે ન જાનન્તિ કેશવમ્ ॥ ૭॥

રુદ્રાત્પ્રવર્તતે બીજં બીજયોનિર્જનાર્દનઃ ।

યો રુદ્રઃ સ સ્વયં બ્રહ્મા યો બ્રહ્મા સ હુતાશનઃ ॥ ૮॥

બ્રહ્મવિષ્ણુમયો રુદ્ર અગ્નીષોમાત્મકં જગત્ ।
પુંલિઙ્ગં સર્વમીશાનં સ્ત્રીલિઙ્ગં ભગવત્યુમા ॥ ૯॥

ઉમારુદ્રાત્મિકાઃ સર્વાઃ પ્રજાઃ સ્થાવરજઙ્ગમાઃ ।
વ્યક્તં સર્વમુમારૂપમવ્યક્તં તુ મહેશ્વરમ્ ॥ ૧૦॥

ઉમા શઙ્કરયોગો યઃ સ યોગો વિષ્ણુરુચ્યતે ।
યસ્તુ તસ્મૈ નમસ્કારં કુર્યાદ્ભક્તિસમન્વિતઃ ॥ ૧૧॥

આત્માનં પરમાત્માનમન્તરાત્માનમેવ ચ ।
જ્ઞાત્વા ત્રિવિધમાત્માનં પરમાત્માનમાશ્રયેત્ ॥ ૧૨॥

અન્તરાત્મા ભવેદ્બ્રહ્મા પરમાત્મા મહેશ્વરઃ ।
સર્વેષામેવ ભૂતાનાં વિષ્ણુરાત્મા સનાતનઃ ॥ ૧૩॥

અસ્ય ત્રૈલોક્યવૃક્ષસ્ય ભૂમૌ વિટપશાખિનઃ ।
અગ્રં મધ્યં તથા મૂલં વિષ્ણુબ્રહ્મમહેશ્વરાઃ ॥ ૧૪॥

કાર્યં વિષ્ણુઃ ક્રિયા બ્રહ્મા કારણં તુ મહેશ્વરઃ ।
પ્રયોજનાર્થં રુદ્રેણ મૂર્તિરેકા ત્રિધા કૃતા ॥ ૧૫॥

ધર્મો રુદ્રો જગદ્વિષ્ણુઃ સર્વજ્ઞાનં પિતામહઃ ।
શ્રીરુદ્ર રુદ્ર રુદ્રેતિ યસ્તં બ્રૂયાદ્વિચક્ષણઃ ॥ ૧૬॥

કીર્તનાત્સર્વદેવસ્ય સર્વપાપૈઃ પ્રમુચ્યતે ।
રુદ્રો નર ઉમા નારી તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૧૭॥

રુદ્રો બ્રહ્મા ઉમા વાણી તસ્મૈ તસ્યૈ નમો નમઃ ।
રુદ્રો વિષ્ણુરુમા લક્ષ્મીસ્તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૧૮॥

રુદ્રઃ સૂર્ય ઉમા છાયા તસ્મૈ તસ્યૈ નમો નમઃ ।
રુદ્રઃ સોમ ઉમા તારા તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૧૯॥

રુદ્રો દિવા ઉમા રાત્રિસ્તસ્મૈ તસ્યૈ નમો નમઃ ।
રુદ્રો યજ્ઞ ઉમા વેદિસ્તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૨૦॥

રુદ્રો વહ્નિરુમા સ્વાહા તસ્મૈ તસ્યૈ નમો નમઃ ।
રુદ્રો વેદ ઉમા શાસ્તં તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૨૧॥

રુદ્રો વૃક્ષ ઉમા વલ્લી તસ્મૈ તસ્યૈ નમો નમઃ ।
રુદ્રો ગન્ધ ઉમા પુષ્પં તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૨૨॥

રુદ્રોઽર્થ અક્ષરઃ સોમા તસ્મૈ તસ્યૈ નમો નમઃ ।
રુદ્રો લિઙ્ગમુમા પીઠં તસ્મૈ તસ્યૈ નમો નમઃ ॥ ૨૩॥

સર્વદેવાત્મકં રુદ્રં નમસ્કુર્યાત્પૃથક્પૃથક્ ।
એભિર્મન્ત્રપદૈરેવ નમસ્યામીશપાર્વતી ॥ ૨૪॥

યત્ર યત્ર ભવેત્સાર્ધમિમં મન્ત્રમુદીરયેત્ ।
બ્રહ્મહા જલમધ્યે તુ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૫॥

સર્વાધિષ્ઠાનમદ્વન્દ્વં પરં બ્રહ્મ સનાતનમ્ ।
સચ્ચિદાનન્દરૂપં તદવાઙ્મનસગોચરમ્ ॥ ૨૬॥

તસ્મિન્સુવિદિતે સર્વં વિજ્ઞાતં સ્યાદિદં શુક ।
તદાત્મકત્વાત્સર્વસ્ય તસ્માદ્ભિન્નં નહિ ક્વચિત્ ॥ ૨૭॥

દ્વે વિદ્યે વેદિતવ્યે હિ પરા ચૈવાપરા ચ તે ।
તત્રાપરા તુ વિદ્યૈષા ઋગ્વેદો યજુરેવ ચ ॥ ૨૮॥

સામવેદસ્તથાથર્વવેદઃ શિક્ષા મુનીશ્વર ।
કલ્પો વ્યાકરણં ચૈવ નિરુક્તં છન્દ એવ ચ ॥ ૨૯॥

જ્યોતિષં ચ યથા નાત્મવિષયા અપિ બુદ્ધયઃ ।
અથૈષા પરમા વિદ્યા યયાત્મા પરમાક્ષરમ્ ॥ ૩૦॥

યત્તદદ્રેશ્યમગ્રાહ્યમગોત્રં રૂપવર્જિતમ્ ।
અચક્ષુઃશ્રોત્રમત્યર્થં તદપાણિપદં તથા ॥ ૩૧॥

નિત્યં વિભું સર્વગતં સુસૂક્ષ્મં ચ તદવ્યયમ્ ।
તદ્ભૂતયોનિં પશ્યન્તિ ધીરા આત્માનમાત્મનિ ॥ ૩૨॥

યઃ સર્વજ્ઞઃ સર્વવિદ્યો યસ્ય જ્ઞાનમયં તપઃ ।
તસ્માદત્રાન્નરૂપેણ જાયતે જગદાવલિઃ ॥ ૩૩॥

સત્યવદ્ભાતિ તત્સર્વં રજ્જુસર્પવદાસ્થિતમ્ ।
તદેતદક્ષરં સત્યં તદ્વિજ્ઞાય વિમુચ્યતે ॥ ૩૪॥

જ્ઞાનેનૈવ હિ સંસારવિનાશો નૈવ કર્મણા ।
શ્રોત્રિયં બ્રહ્મનિષ્ઠં સ્વગુરું ગચ્છેદ્યથાવિધિ ॥ ૩૫॥

ગુરુસ્તસ્મૈ પરાં વિદ્યાં દદ્યાદ્બ્રહ્માત્મબોધિનીમ્ ।
ગુહાયાં નિહિતં સાક્ષાદક્ષરં વેદ ચેન્નરઃ ॥ ૩૬॥

છિત્વાઽવિદ્યામહાગ્રન્થિં શિવં ગચ્છેત્સનાતનમ્ ।
તદેતદમૃતં સત્યં તદ્બોદ્ધવ્યં મુમુક્ષિભિઃ ॥ ૩૭॥

ધનુસ્તારં શરો હ્યાત્મા બ્રહ્મ તલ્લક્ષ્યમુચ્યતે ।
અપ્રમત્તેન વેદ્ધવ્યં શરવત્તન્મયો ભવેત્ ॥ ૩૮॥

લક્ષ્યં સર્વગતં ચૈવ શરઃ સર્વગતો મુખઃ ।
વેદ્ધા સર્વગતશ્ચૈવ શિવલક્ષ્યં ન સંશયઃ ॥ ૩૯॥

ન તત્ર ચન્દ્રાર્કવપુઃ પ્રકાશતે
ન વાન્તિ વાતાઃ સકલા દેવતાશ્ચ ।
સ એષ દેવઃ કૃતભાવભૂતઃ
સ્વયં વિશુદ્ધો વિરજઃ પ્રકાશતે ॥ ૪૦॥

દ્વૌ સુપર્ણૌ શરીરેઽસ્મિઞ્જીવેશાખ્યૌ સહ સ્થિતૌ ।
તયોર્જીવઃ ફલં ભુઙ્ક્તે કર્મણો ન મહેશ્વરઃ ॥ ૪૧॥

કેવલં સાક્ષિરૂપેણ વિના ભોગં મહેશ્વરઃ ।
પ્રકાશતે સ્વયં ભેદઃ કલ્પિતો માયયા તયોઃ ॥ ૪૨॥

ઘટાકાશમઠાકાશૌ યથાકાશપ્રભેદતઃ ।
કલ્પિતૌ પરમૌ જીવશિવરૂપેણ કલ્પિતૌ ॥ ૪૩॥

તત્ત્વતશ્ચ શિવઃ સાક્ષાચ્ચિજ્જીવશ્ચ સ્વતઃ સદા ।
ચિચ્ચિદાકારતો ભિન્ના ન ભિન્ના ચિત્ત્વહાનિતઃ ॥ ૪૪॥

ચિતશ્ચિન્ન ચિદાકારદ્ભિદ્યતે જડરૂપતઃ ।
ભિદ્યતે ચેજ્જડો ભેદશ્ચિદેકા સર્વદા ખલુ ॥ ૪૫॥

તર્કતશ્ચ પ્રમાણાચ્ચ ચિદેકત્વવ્યવસ્થિતેઃ ।
ચિદેકત્વપરિજ્ઞાને ન શોચતિ ન મુહ્યતિ ॥ ૪૬॥

અદ્વૈતં પરમાનન્દં શિવં યાતિ તુ કૈવલમ્ ॥ ૪૭॥

અધિષ્ઠાનં સમસ્તસ્ય જગતઃ સત્યચિદ્ઘનમ્ ।
અહમસ્મીતિ નિશ્ચિત્ય વીતશોકો ભવેન્મુનિઃ ॥ ૪૮॥

સ્વશરીરે સ્વયં જ્યોતિઃસ્વરૂપં સર્વસાક્ષિણમ્ ।
ક્ષીણદોષાઃ પ્રપશ્યન્તિ નેતરે માયયાવૃતાઃ ॥ ૪૯॥

એવં રૂપપરિજ્ઞાનં યસ્યાસ્તિ પરયોગિનઃ ।
કુત્રચિદ્ગમનં નાસ્તિ તસ્ય પૂર્ણસ્વરૂપિણઃ ॥ ૫૦॥

આકાશમેકં સમ્પૂર્ણં કુત્રચિન્નૈવ ગચ્છતિ ।
તદ્વત્સ્વાત્મપરિજ્ઞાની કુત્રચિન્નૈવ ગચ્છતિ ॥ ૫૧॥

સ યો હ વૈ તત્પરમં બ્રહ્મ યો વેદ વૈ મુનિઃ ।
બ્રહ્મૈવ ભવતિ સ્વસ્થઃ સચ્ચિદાનન્દ માતૃકઃ ॥ ૫૨॥

ઇત્યુપનિષત્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ રુદ્રહૃદયોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Rudrahridaya Upanishad*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*